# 8. काषायाणां कोऽपराधः

[Kakasaheb Kalelakar worked with Mahatma Gandhi for a long time and had the opportunity to stay with him, to travel with him and to exchange ideas with him.

Of the many incidents of this period, Kakasaheb Kalelakar has, because of his literary prowess, given aesthetic form to many of them. Of these, many provide us with inspiration even today. One such interesting incident which was written by Kakasaheb Kalelakar in Gujarati, has been translated into simple Sanskrit, edited and presented here as a lesson.

The main moral of this story is that one should not allow one's position to become an obstacle in the process of social service. Moreover, all of us should also realize that there is no permanent relationship between religion and attire.]

महात्मा गान्धिमहोदयः स्वातन्त्र्यान्दोलनं प्रारभत । अस्यान्दोलनस्य निखिलोऽपि व्यवहारः प्रारम्भेषु दिवसेषु साबरमती-आश्रमे एव प्राचलत् । एकस्मिन् दिवसे स्वामी सत्यदेवः आश्रमम् आगच्छत् । सः देशस्य स्वतन्त्रतार्थं कार्यरतस्य गान्धिमहोदयस्य कार्येण अतीव प्रभावितः प्रसन्नः चासीत् । सः गान्धिमहोदयायाकथयदहं भवतः आश्रमे प्रवेशं निवासं च इच्छामि । देशस्य स्वतन्त्रतायै कार्यं कर्तुं ममापि महतीच्छा वर्तते ।



सत्यदेवस्य प्रस्तावं गान्धिमहोदयः स्वीकृत-वान् । गान्धिमहोदयः अकथयत् - ''साधु, स्वागतमत्र भवतः । आश्रमोऽयं भवत एव, किन्तु आश्रमप्रवेशात् पूर्वं भवता काषायवस्त्राणां त्यागः करणीयः ।'' गान्धिमहोदयस्य आदेशं श्रुत्वा आश्चर्यान्वितः स्वामिसत्यदेवः मनसि अकुप्यत् । किन्तु सः गान्धिमहोदयस्य पुरतः निजरोषं नाप्रकटयत् । सोऽकथयत्, ''कथं काषायवस्त्राणां त्यागः ? काषायवस्त्राणां कोऽपराधः ? अहं संन्यासिजनः । संन्यासिनः काषायवस्त्राणि परिधारयन्ति । अहं काषायवस्त्राणां त्यागं कर्तुं कथं प्रवृत्तो भवामि ।''

स्वामिसत्यदेवस्य वचनं श्रुत्वा शान्तस्वरेण गान्धिमहोदयः अकथयत्, ''भवता यदुक्तं तत्सत्यमस्ति । किन्तु भवान् संन्यासस्य त्यागं करोतु इति न ममाशयः । केवलं काषायवस्त्राणां त्यागं कर्तुं वदामि ।''

गान्धिमहोयदस्य कथनतात्पर्यमजानानः सत्यदेवः विचारमुद्रायां स्थितः, मौनं चावलम्बितवान् ।

तस्य तादृशीं मनोदशाम् अवगम्य गान्धिमहोदयः स्वकीयमाशयं स्पष्टं कर्तुं शान्तभावेन मृदुभाषया च सत्यदेवायाकथयत् । – ''शृणोतु भवान् सावधानेन मनसा । वयं अन्येषां सेवां कर्तुं प्रवृत्ताः स्मः । एतदेवास्माकं ध्येयमस्ति । भवान् जानात्येव यदस्माकं देशे जनाः काषायवस्त्रधारिणः संन्यासिनः सेवां कर्तुं सदैव समुत्सुकाः भवन्ति । यदा भवान् सेवाकार्याय प्रवृत्तः भविष्यति तदा काषायवस्त्रधारिणं भवन्तं दृष्ट्वा एकतः ते भवतः सेवाकार्यं न अङ्गीकरिष्यन्ति, अपरतः ते भवतः सेवां कर्तुं प्रवृत्ताः भविष्यन्ति । अनेन किमस्माकं ध्येयस्य हानिः न भविष्यति ? संन्यासस्तु मनोगतः सङ्कल्पः एव । तस्य परिधानेन सह सम्बन्धः कयापि दृष्ट्या न योग्यः । अहं निश्चितं मन्ये यत् काषायवस्त्राणां त्यागेन संन्यासत्यागः नैव भविष्यति । अतः विचारयतु भवान्, तदनन्तदरं यद्योग्यम् तत्करोतु ।''

गान्धिमहोदयस्य एतादृशं वचनं श्रुत्वा स्वामिसत्यदेवस्य संशयः तस्मिन्नेव क्षणे व्यपगतः । सः काषायवस्त्राणां त्यागं कृत्वा सेवाकार्ये आत्मानं योजयितुं सन्नद्धोऽभवत् ।

## Glossary

**Noun : (masc.) : निजरोषः** self-anger **अपराधः** fault **सङ्कल्पः** determination, intension

**(Fem.) : विचारमुद्रा** thoughtful posture **मनोदशा** mental state **हानिः** loss

**(Neu.) : आन्दोलनम्** movement (revolutionary) **काषायवस्त्रम्** saffron clothes (The clothes worn by Sanyasis is of saffron colour.) **मौनम्** silence **ध्येयम्** aim.

**Pronoun : एकस्मिन्** in one **भवतः** your (masc.) **अन्येषाम्** of others **अस्माकम्** our **भवन्तम्** to you

**Adjective : निखिल** whole, complete **कार्यरत** engrossed in work **प्रसन्न** happy, joyful **महती** great, big **स्वकीय** one's own **मनोगत** remaining in mind **सन्नद्ध** ready, fully equipped.

**Adverb : अतीव** very much **साधु** well **एकतः** on one side **अपरतः** on other side

**Compound :** स्वातन्त्र्यान्दोलनम् (स्वातन्त्र्यस्य आन्दोलनम् । षष्ठी तत्पुरुष) । कार्यरतस्य (कार्येषु रतः – कार्यरतः, तस्य । सप्तमी तत्पुरुष) । आश्रमप्रवेशात् (आश्रमस्य प्रवेशः – आश्रमप्रवेशः, तस्मात् । (षष्ठी तत्पुरुष) । निजरोषम् (निजस्य रोषः निजरोषः, तम् । षष्ठी तत्पुरुष) । कथनतात्पर्यम् कथनस्य तात्पर्यम् । षष्ठी तत्पुरुष) । विचारमुद्रायाम् (विचारस्य मुद्रा विचारमुद्रा, तस्याम् । षष्ठी तत्पुरुष) । मनोदशाम् (मनसः दशा, मनोदशा, ताम् । षष्ठी तत्पुरुष) । सेवाकार्याय (सेवायाः कार्यम् सेवाकार्यम्, तस्मै । षष्ठी तत्पुरुष) । मनोगतः (मनः गतः, द्वितीया तत्पुरुष) । संन्यासत्यागः (संन्यासस्य त्यागः । षष्ठी तत्पुरुष) ।

**Participle :** कर्तुम् (कृ + तुम्) । श्रुत्वा (श्रु + त्वा) । अवगम्य (अव + गम् + त्वा > य) । दृष्ट्वा (दृश् + त्वा) योजयितुम् (युज्–(प्रेरक) + तुम्) ।

**Root : (First Gana)** (Parasmaipada) **प्र + चल्** (**प्रचलति**) to walk **आ + गम् > गच्छ्** (**आगच्छति**) to come **इष्–इच्छ्** (**इच्छति**) to desire.

(Atmanepada) **प्र + आ + रभ्** **( प्रारभते )** to begin, to start

**(Fourth Gana)** (Parasmaipada) **कुप्** **( कुप्यति )** to be angry, to get angry

**(Tenth Gana)** (Parasmaipada) **वि + चर्** **( विचारयति )** to think

## Notes

**(1) Meaning :** **प्रभावित:** is impressed **प्रसन्न:** happy, pleased **प्रस्तावम्** to proposal, suggestion **स्वीकृतवान्** has accepted **करणीय:** should be done **आश्चर्यान्वित:** one who is astonished **मनसि** in mind **न अप्रकटयत्** did not reveal **संन्यासिजना:** Samnyasis, mendicants **परिधारयन्ति** wear **सन्** been **मम आशय:** my intention **अजानान:** not knowing **मौनम् अवलम्बितवान्** remained silent **प्रवृत्ता: स्म:** we have become ready **समुत्सुका:** eager **न अङ्गीकरिष्यन्ति** will not accept **परिधानेन सह** with clothes (attire) **कयापि दृष्ट्या** in any way (from any point of view) **विचारयतु भवान्** you keep thinking **तदनन्तरम्** thereafter **व्यपगत:** went away

**(2) Sandhi :** अस्यान्दोलनस्य (अस्य आन्दोलनस्य) । निखिलोऽपि (निखिल: अपि) । गान्धिमहोदयायाकथयदहम् (गान्धिमहोदयाय अकथयत् अहम्) । ममापि (मम अपि) । महतीच्छा (महती इच्छा) । नाप्रकटयत् (न अप्रकटयत्) । प्रवृत्तो भवामि (प्रवृत्त: भवामि) । एतदेवास्माकम् (एतत् एव अस्माकम्) । जानात्येव (जानाति एव) । संन्यासस्तु (संन्यास: तु) । यद्योग्यम् (यत् योग्यम्) ।

## Exercises

**1. निम्नप्रश्नानाम् उत्तराणि समुचितं विकल्पं चित्वा लिखत ।**

(1) स्वातन्त्र्यान्दोलनस्य व्यवहार: आरम्भदिनेषु कुत्र प्राचलत् ? ◯

(क) साबरमती-आश्रमे (ख) वर्धा-आश्रमे (ग) दांडीसमीपे (घ) पालडी-ग्रामे

(2) गान्धिमहोदयस्य कार्येण क: प्रभावित: प्रसन्न: च आसीत् ? ◯

(क) सत्यदेव: (ख) महादेव: (ग) निपुणस्वामी (घ) जवाहरलाल:

(3) गान्धिमहोदयस्य पुरत: किं कर्तुं सत्यदेव: समर्थ: न अभवत् ? ◯

(क) सेवाकार्यम् (ख) रोषं प्रकटयितुम् (ग) रोषं गोपयितुम् (घ) आश्रमं गन्तुम्

(4) सत्यदेवस्य वचनं श्रुत्वा गान्धिमहोदय: कथम् अवदत् ? ◯

(क) शान्तस्वरेण (ख) क्रुद्धस्वरेण (ग) श्रान्तस्वरेण (घ) दृढसंकल्पेन

(5) संन्यास: कीदृश: सङ्कल्प: वर्तते । ◯

(क) मननीय: (ख) मोहगत: (ग) मनोगत: (घ) काषायपरिधानस्य

**2. अधोलिखितानां प्रश्नानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) सत्यदेवः कः आसीत् ?

(2) गान्धिमहोदयस्य ध्येयं किम् आसीत् ?

(3) जनाः कस्य सेवां न अङ्गीकुर्वन्ति ?

(4) कस्य त्यागेन संन्यासस्य त्यागः न भवति ?

(5) स्वामिसत्यदेवः किमर्थं सन्नद्धः अभवत् ?

**3. अधोलिखितानि क्रियापदानि वर्तमानकालस्य (लट्लकारस्य) रूपत्वेन परिवर्तयत ।**

(1) प्रारभत (2) आगच्छत् (3) अकथयत्

(4) भविष्यन्ति (5) अकुप्यत्

**4. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितपदं चित्वा प्रश्नवाक्यं रचयत ।**

(के, केषाम्, कीदृशेन, कस्य, कः)

(1) सत्यदेवस्य प्रस्तावं गान्धिमहोदयः स्वीकृतवान् ।

(2) संन्यासिजनाः काषायवस्त्राणि परिधारयन्ति ।

(3) केवलं काषायवस्त्राणां त्यागं कर्तुं वदामि ।

(4) शृणोतु भवान् सावधानेन मनसा ।

(5) ते भवतः सेवाकार्यं न अङ्गीकरिष्यन्ति ।

**5. शब्दरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | ................ | ................ | दिवसेषु |
| (2) | कार्यरतस्य | ................ | ................ |
| (3) | ................ | ................ | स्वरैः |
| (4) | ................ | त्यागाभ्याम् | ................ |
| (5) | देशे | ................ | ................ |

**6. उदाहरणानुसारं धातुरूपाणां परिचयं कारयत ।**

**उदाहरणम् :**

| | धातुरूपम् | कालः | पदम् | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| | मन्ये | वर्तमानकालः | आत्मनेपदम् | उत्तमपुरुषः | एकवचनम् |
| (1) | भविष्यन्ति | ................ | ................ | ................ | ................ |

| | | | | | |
|---|---|---|---|---|---|
| (2) | प्राचलत् | ................ | ................ | ................ | ................ |
| (3) | अकथयत् | ................ | ................ | ................ | ................ |
| (4) | भवामि | ................ | ................ | ................ | ................ |

**7. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) One day he came to Ashrama.

एक दिवस आश्रम आ + गम् ।

(2) He was very much impressed by work.

कार्य अतीव प्रभावित अस् ।

(3) How can I be ready to give up ?

त्याग कृ+तुम् कथम् प्रवृत्त भू ।

(4) I tell you to give up only saffron clothes.

केवल काषायवस्त्र त्याग वद् ।

**8. कृदन्त-प्रकारं लिखत ।**

(1) विकीर्य ................ ।

(2) भवितुम् ................ ।

(3) आदाय ................ ।

(4) छेत्तुम् ................ ।

(5) धृत्वा ................ ।

**9. मातृभाषया उत्तराणि लिखत ।**

(1) What was going on in the Ashrama ?

(2) Why did Swami Satyadeva wish to gain entry in the Ashrama ?

(3) What did Gandhiji say calmly ?

(4) How do people of our country behave with Samnyasis ?

(5) What did Satyadeva do at last after listening to Gandhiji's word ?

**Activity**

- Visit Sabarmati Ashrama.
- Get information regarding Satyagrah movement during freedom-fight.
- Get and read the book सत्यशोधनम् autobiography of Gandhiji.

•